श्री दुर्गा परमेश्वरी स्तोत्रं

श्री दुर्गा परमेश्वरी स्तोत्रं

(शृंगेरी जगद्गुरु विरचितं)

एतावंतं समयं
सर्वापद्भ्योऽपि रक्षणं कृत्वा |
देशस्य परमिदानीं
तटस्थ्यं केन वहसि दुर्गांब || 1 ||

अपराधा बहुशः खलु
पुत्राणां प्रतिपदं भवंत्येव |
को वा सहते लोके
सर्वांस्तान्मातरं विहायैकां || 2 ||

मा भज मा भज दुर्गे
तटस्थ्यं पुत्रकेषु दीनेषु |
के वा गृह्णंति सुतान्
मात्रा त्यक्तान्वदांबिके लोके || 3 ||

इतः परं वा जगदंब जातु
देशस्य रोगप्रमुखापदोऽस्य |
न स्युस्तथा कुर्वचलां कृपां
इत्यभ्यर्थनां मे सफलीकुरुष्व || 4 ||

पापहीनजनतावनदक्षाः
संति निर्जरवरा न कियंतः |
पापपूर्णजनरक्षणदक्षां
त्वां विना भुवि परां न विलोके || 5 ||

इति शृंगेरी जगद्गुरु विरचितं श्री दुर्गा परमेश्वरी स्तोत्रं ||